## Ajamoda:

अजमोदा खराह्वा च बस्तमोदा च मर्कटी ।
मोदा गन्धदला हस्ती कारवी गन्धपत्रिका ।।
मायूरी शिखिमोदा च मोदाढ्या वह्निदीपिका ।
ब्रह्मकोशी विशाली च हृद्यगन्धोग्रगन्धिका ।।
मोदिनी फलमुख्या च वसुचन्द्राभिधा मता । (Rjn)

Synonyms of ajamoda are kharahva, bastamoda, markati, moda, gandhadala hasti, karavi, gandhapatrika, mayuri, sikhimoda, modadhya, vahnidipika, brahmakosi, visali, hrdyagandha, ugragandhika, modini, phalamukhya, vasucandrabhidha.

रसे पाके च कटुको वीर्योष्णस्त्वजमोदकः ।
दीपनः पाचनः शूलकृमिघ्नः कफपित्तहा ।। (Mdn)

Ajamoda is Katu in Taste and Vipaka, Usna in Potency, Dipana and Pacana in Karma, is used in Sula and Krmi and is Kapha Pitta hara.

अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत् ।
उष्णा विदाहिनी हृद्या वृष्या बलकरी लघुः ।।
नेत्रामयकफच्छर्दिहिक्कावस्तिरुजो हरेत् । (Bpn)

Ajamoda is Katu in Taste, Tiksna in Property, Dipani in Karma, pacifies Kapha and Vata, Usna in Potency, Vidahini-Hrdya-Vrsya-Balakari in Karma, Laghu in Property and is used in Netramaya, Kapha, Chardi, Hikka and Vasti ruja.

अजमोदा कटुस्तिक्ता मलावष्टंभकारिणी ।
उदराणि कुमींश्चैव वान्तिनेत्ररुजं जयेत् ।।
वस्तिशूलं दन्तरोगं गुल्मं शुक्लरुजं तथा । (Nir)

Ajamoda is katu and tikta in rasa, malavastambhakarini in karma, is used in udara, krmi, vanti, netra ruja, vastisula, danta roga, gulma and sukla ruja.

**अजमोदा च शूलघ्नी तिक्तोष्णा कफवातजित् ।**
**हिक्काध्मानारुचिर्हन्ति कृमिजिद्वह्निदीपनी ।। (Dhn)**

Ajamoda is Sulaghna in Karma, Tikta in Taste, Usna in Potency, Kapha Vata jit, and is used in Hikka, Adhmana, Aruci, Krmi, is Vahni Dipani in Karma.

**अजमोदा कटुरुष्णा रूक्षा कफवातहारिणो रुचिकृत् ।**
**शूलाध्मानारोचकजठरामयनाशनी चैव ।। (Rjn)**

Ajamoda is Katu in Taste, Usna in Potency, Ruksa in Property, Kapha Vata hara, Rucikrt in Karma, is used in Sula, Adhmana, Arocaka and Jatharamaya.

**अजमोदा कटुसित्कता कटुपाका विदाहिनी ।**
**दीपनी पाचनी रूक्षा वीर्योष्णा कफवातहा ।।**
**लघुस्तिक्ता बद्धविट्का हृद्या वृष्या विनाशयेत् ।**
**नेत्ररोगारुचिच्छिर्दिहिध्मावस्तिरुक्कृमीन् ।। (Kdn)**

Ajamoda is Katu and Tikta in Taste, Katu in Vipaka, Vidahini-Dipani-Pacani in Karma, Ruksa in Guna, Usna in Virya, Kapha Vata hara, Laghu in Property, is used in Baddha vit, is Hrdya-Vrsya in Karma, and is used in Netra roga, Aruci, Chardi, Hidhma, Adhmana, Vasti ruk and Krmi.